तृणे (गोयाल) अमरः स्त्रियां ङीप् । [मत्स्ये शब्दर०

**सहस्रदंष्ट्रिन्** पु० सहस्रं दंष्ट्राः सन्त्यस्य इनि । पाठीनमत्स्ये शब्दर०

**सहस्रधारा** स्त्री सहस्रगुणिता धारा । देवस्नानार्थं बहुच्छिद्रयन्त्रनिःसृतबहुजलादिधारायाम् ।

**सहस्रनयन** पु० सहस्रं नयनान्यस्य । १इन्द्रे इत्वा० सहस्रनेत्रादयोऽप्यत्र । २पेचके च ।

**सहस्रपत्र** न०सहस्रं बहुसंख्यकानि पत्राणि यस्य । १पद्मे अमरः । सहस्रदलादयोऽप्यत्र । २सारसे खगे च ।

**सहस्रपाद्** पु०सहस्रं बहवः पादा अस्य अन्त्यलोपः समा० । १विष्णौ २परमेश्वरे च "सहस्राक्षः सहस्रपाद्" पुरुषसूक्तम् ।

**सहस्रपाद** पु० सहस्रं पादाः किरणाश्चरणा वा सन्त्यस्य अच् । १विष्णौ २सूर्य्ये ३अर्कवृक्षे च । ४कारण्डखगे पुंस्त्री० मेदि० स्त्रियां ङीष् ।

**सहस्रबाहु** पु०सहस्रं बाहवोऽस्य । १बाणासुरे "बाणः पुत्रशतज्येष्ठो बलेरासीन्महात्मनः । सहस्रबाहुर्वाद्येन ताण्डवेऽतोषयत् शिवम्" भाग०१०।६२अ० । २कार्त्तवीर्य्यार्जुने । ३विष्णौ च "सहस्रबाहो भव विश्वमूर्त्ते !" गीता०

**सहस्रभुज** पु० सहस्रं बहवो भुजा अस्य । १विष्णौ २कार्त्तवीर्य्यार्जुने च । ५महालक्ष्म्यां स्त्री "अष्टादशभुजा पूज्या सा सहस्रभुजा रणे" मार्कण्डेयपु० ।

**सहस्रमूर्द्धन्** पु० सहस्रं बहवो मूर्द्धानोऽस्य । १विष्णौ पुरुषसूक्तम् २सहस्रशीर्षादयोऽप्यत्र । [लतायां राजनि० ।

**सहस्रमूली** स्त्री सहस्रं बहूनि मूलान्यस्याः ङीप् । द्रवन्ती-

**सहस्रवीर्य्या** स्त्री सहस्रं बहूनि वीर्य्याण्यस्याः । १दूर्वायाम् अमरः । २महाशतावर्य्याञ्च राजनि० । [भेदे राजनि० ।

**हस्रवेध** न० सहस्रं बहवो वेधा यस्य । १चुक्रे २काञ्जिक-

**सहस्रवेधिन्** न० सहस्रं विध्यति विध-णिनि । १हिङ्गौ २अम्लवेतसे च मेदि० । ३कस्तूर्य्यां पु० राजनि० । ४सहस्रवेधकर्त्तरि त्रि० । [भावप्र० ।

**सहस्रा** स्त्री सहस्रं दलानि सन्त्यस्याः अच् । अम्बष्ठायां

**सहस्रांशु** पु०सहस्रमंशवो यस्य । १सूर्य्ये २अर्कवृक्षे च अमरः

**सहस्रानीक** पु० ६त० संज्ञात्वात् णत्वम् । शतानीकन्टपसुते राजभेदे वह्निपु० ।

**सहस्राक्ष** पु० सहस्रमक्षीणि यस्य षच् समा० । १इन्द्रे २पेचके अमरः । ३विष्णौ पुरुषसू० ४ईश्वरे च ।

**सहस्रार** न०सहस्रमाराः कोणा यस्य । शिरःस्थिते सुषुम्णानाडीमध्यस्थे सहस्रदलकमले तन्त्रसा० ।

**सहस्रिन्** पु० सहस्रं सैन्यानि सन्त्यस्य इनि । १सहस्रसैन्य-युक्ते न्टपादौ अमरः २सहस्रदंष्ट्रपाठीने मत्स्ये च

**सहा** स्त्री सहते सह-अच् । १मुद्गपर्ण्यां २घृतकुमार्य्याम् अमरः । ३खण्डोत्पलायां ४पृथिव्यां ५नखभेषजे मेदि० । ६शुक्लझिण्ट्याम् ७सर्पकङ्काल्यां शब्दर० ८रास्नायां स्वर्णक्षीर्य्यां रत्नमा० १०नारीपुष्पे राजनि० ।

**सहाचर** पु० सहा शुक्लझिण्टीव आचरति आ+चर-अच् । पीतझिण्ट्यां शब्दर० । [अमरः ।

**सहाय** पु० सह एति इण-अच् । १सहचरे २अनुकूले

**सहायता** स्त्री सहायानां समूहः तस्य भावो वा तल् । १साहाय्ये २सहायसमुदाये च अमरः ।

**सहार** पु० सह एकदैव ऋच्छति दूरं गच्छति सौरभेण ऋ-अच् । १सहकारे आम्रे उणा० । हारोहरणं सह हारेण । २महाप्रलये हारा० । ३हारेण सहिते त्रि० ।

**सहारोग्य** त्रि० सह आरोग्येण । रोगशून्ये हेमच० ।

**सहासन** न० सह आस्यतेऽत्र आस-ल्युट् । एकासने ।

**संहित** त्रि० सम्यक् हितः समोऽन्त्यलोपः । १सम्यग्हिते सह-क्त वा इट् सह+इतच् वा । २समभिव्याहृते सि० कौ० ३हितेन सहिते च । [सोढाप्यत्र स्त्रियां ङीप् ।

**सहितृ** त्रि० सह-तृच् वा इट् । सहनशीले । इड्भावे

**सहित्र** न० सह्यतेऽनेन सह-इत्र । सहनसाधने धर्मभेदे ।

**सहिष्णु** त्रि० सह-इष्णुच् । सहनशीले अमरः ।

**सहिष्णुता** स्त्री सहिष्णोर्भावः तल् । १क्षमायाम् २शीतोष्णादिविरुद्धधर्मद्वयसहने ।

**सहुरि** पु०सह-उरि । १ सूर्य्ये उणादिकोषः । २अर्कवृक्षे च ।

**सहृदय** त्रि० सह-हृदयेन । १प्रशस्तचित्ते २काव्यार्थभावनाधीनपरिपक्वबुद्धौ सा०द० "परिष्कुर्वन्त्वर्थान् सहृदयधुरीणाः कतिपये" रसगङ्गाधरः ।

**सहृल्लेख** पु० हृदयस्य लेखः कालुष्यकरणं हृल्लासः सह हृल्लेखेन । "विचिकित्सा तु हृदये यस्य यस्मिन् प्रजायते । सहृल्लेखन्तु विज्ञेयं पुरीषन्तु स्वभावतः" इत्युक्ते दूषितान्ने प्रा०त्रि० । २हृल्लेखा सहिते मन्त्रे च तन्त्र०

**सहोक्ति** स्त्री सह उक्तिः । सहकथने १एकोक्तौ सहशब्दस्योक्तिर्यत्र । २अर्थालङ्कारभेदे अलङ्कारशब्दे ४०७पु०दृश्यम्

**सहोटज** पुं न० । सहते आतपादयत्र सह-अच् कर्म० । मुनीनां पर्णशालायाम् हारा० ।

**सहोढ** पु० सह ऊढया । "या गर्भिणी संस्क्रियते ज्ञाताऽज्ञातापि वाऽसती । वोढुः स गर्भो भवति सहोढ इति चोच्यते" इति मनूक्ते अज्ञातगर्भायाः परिणीतायाः